श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीदेहळीशस्तुतिः ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

# ॥ श्रीदेहळीशस्तुतिः ॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विक्रम्य येन विजितानि जगन्ति भूम्ना
विश्वस्य यं परम कारणमामनन्ति।
विश्राणयन् प्रणयिनां विविधान् पुमर्थान्
गोप्ता स मे भवतु गोपपुराधिराजः॥ १॥

देहळ्यधीश्वर तवेदृशमीश्वरत्वं
तुष्टूषतां दिशति गद्गदिकानुबन्धम्।
वाचालयत्यथ च मां क्वचन क्षपायां
क्षान्तेन दान्त कवि मुख्य विमर्दनेन॥ २॥

त्वच्चक्रवद् द्रुतमनेहसि घूर्णमाने
निम्नोन्नत क्रम निदर्शित नेमि वृत्ताः।
आराध्य गोप नगरे कृपयोदितं त्वां
स्वाराज्यमग्र्यमलभन्त सुरासुरेन्द्राः॥ ३॥

आकल्प पुष्प सुभगोन्नत बाहु शाखः
पादे सदा परिपचेळिम सत्फलस्त्वम्।
पण्णा तट स्पृशि मृकण्डु तपोवनेऽस्मिन्
छाया निलीन भुवनोऽसि तमाल शाखी॥ ४॥

चक्रस्य दैत्य दनुजादिषु वाम भावं
शङ्खस्य चाश्रितजनेष्वपि दक्षिणत्वम्।
व्यक्तं प्रदर्शयसि गोपपुराधिराज
व्यत्यस्य नूनमनयोः कर संप्रयोगम्॥ ५॥

दीपेन केनचिदशीत रुचा निशीथे
स्नेहोपपन्न परिशुद्ध गुणार्पितेन।
दह्रावकाश निबिडं ददृशुर्भवन्तं
स्वाध्याय योग नयनाः शुचयः कवीन्द्राः॥ ६ ॥

कासार पूर्व कवि मुख्य विमर्दजन्मा
पण्णा तटेक्षु सुभगस्य रसो बहुस्ते।
त्वत्पाद पद्म मधुनि त्वदनन्य भोग्ये
नूनं समाश्रयति नूतन शर्करात्वम्॥ ७ ॥

वैरोचनेः सदसि वामन भूमिकावान्
विक्रान्ति ताण्डव रसेन विजृम्भमाणः।
चक्रे भवान् मकर कुण्डल कर्णपाशः
श्यामैक मेघ भरितामिव सप्त लोकीम्॥ ८ ॥

चित्रं न तत् त्रिषु मितानि पदेषु यत् ते
विश्वान्यमूनि भुवनानि विशङ्कटेषु।
भक्तैः समं क्वचिदसौ भवनैकदेशे
माति स्म मूर्तिरमिता तदिहाद्भुतं नः॥ ९ ॥

भक्तप्रिय त्वयि तथा परिवर्धमाने
मुक्ता वितान विततिस्तव पूर्वमासीत्।
हारावळिः परमथो रशना कलापः
तारागणस्तदनु मौक्तिक नूपुर श्रीः॥ १० ॥

भिक्षोचितं प्रकटयन् प्रथमाश्रमं त्वं
कृष्णाजिनं यवनिकां कृतवान् प्रियायाः।
व्यक्ताकृतेस्तव समीक्ष्य भुजान्तरे तां
त्वामेव गोप नगरीश जना विदुस्त्वाम्॥ ११ ॥

सत्कुर्वतां तव पदं चतुराननत्वं
पादोदकं च शिरसा वहतां शिवत्वम्।

एकत्र विक्रमण कर्मणि तद् द्वयं ते
    देहल्यधीश युगपत् प्रथितं पृथिव्याम्॥ १२ ॥

भक्तोपरोधसह पाद सरोजतस्ते
    मन्दाकिनी विगळिता मकरन्द धारा।
सद्यस्त्रिवर्गम् अपवर्गमपि क्षरन्ती
    पुण्या बभूव पुर शासन मौळिमाला॥ १३ ॥

विक्रान्ति केतु पटिका पद वाहिनी ते
    न्यञ्चन्त्युपैति नतजीवित शिंशुमारम्।
औत्तानपादिममृतांशुमशीत भानुं
    हेमाचलं पशुपतिं हिमवन्तमुर्वीम्॥ १४ ॥

वेधः कमण्डलु जलैर्विहितार्चनं ते
    पादाम्बुजं प्रतिदिनं प्रतिपद्यमाना।
स्तोत्रप्रिय त्रिपथगादि सरिद्वराणां
    पण्णा बभूव भुवने बहुमान पात्रम्॥ १५ ॥

स्वच्छन्द विक्रम समुन्नमितादमुष्मात्
    स्रोतस्त्रयं यदभवत् तव पाद पद्मात्।
वेताळ भूत सरसामपदिश्य वाचं
    प्रायेण तत् प्रसव भूमिमवाप भूयः॥ १६ ॥

क्रीडापरेण भवता विहितोपरोधान्
    आराधकाननुपरोधमुदञ्चयिष्यन्।
ताम्रेण पाद नखरेण तदाऽण्डमध्ये
    घण्टापथं कमपि नूनमवर्तयस्त्वम्॥ १७ ॥

कामाविलेऽपि करुणार्णव बिन्दुरेकः
    क्षिप्तः स्वकेळि तरसा तव देहळीश।
तत्संततेरुभयथा विततिं भजन्त्याः
    संसार दाव दहनं शमयत्यशेषम्॥ १८ ॥

नीडोदरान्निपतितस्य शुकार्भकस्य
त्राणेन नाथ विहरन्निव सार्वभौमः।
आदाय गोप नगराधिपते स्वयं मां
क्रीडा दया व्यतिकरेण कृतार्थय त्वम्॥ १९ ॥

लीला शकुन्तमिव मां स्वपदोपलब्ध्यै
स्वैरं क्षिपन् दुरित पञ्जरतो गुणस्थम्।
तत्तादृशं कमपि गोप पुरी विहारिन्
सन्तोषमुल्लळय सागर संभवायाः॥ २० ॥

वातूल कल्प वृजिन प्रभवैर्मदीयां
वैयाकुलीं विषय सिन्धु तरङ्ग भङ्गैः।
दासोपमर्द सह दुर्निरसां त्वदन्यैः
अन्वीक्ष्य गाढमनुकम्पितुमर्हसि त्वम्॥ २१ ॥

एनस्विनीमिति सदा मयि जायमानां
देहळ्यधीश दृषदोऽपि विलापयन्तीम्।
नाथे समग्र शकने त्वयि जागरूके
किं ते सहेत करुणा करुणामवस्थाम्॥ २२ ॥

आत्मोन्नतिं परनिकर्षमपीह वाञ्छन्
निम्ने विमोहजलधौ निपतामि भूयः।
तन्मामुदञ्चय तवोन्नतपाद दघ्नं
देहळ्यधीश गुणितेन दयागुणेन॥ २३ ॥

अक्षीण कल्मष रसोऽपि तवानृशंस्यात्
लक्ष्मी समक्षमपि विज्ञपयाम्यभीतः।
भक्तोपमर्दरसिक स्वयमल्प बुद्धेः
यन्मन्यसे मम हितं तदुपाददीथाः॥ २४ ॥

मन्ये दयार्द्र हृदयेन महा धनं मे
दत्तं त्वयेदमनपायमकिञ्चनत्वम्।

येन स्तनंधयमिव स्वहितानभिज्ञं
    न्यासीकरोषि निज पाद सरोरुहे माम्॥ २५ ॥

दुर्वार तीव्र दुरित प्रतिवावदूकैः
    औदार्यवद्भिरनघ स्मित दर्शनीयैः।
देहळ्यधीश्वर दया भरितैरपाङ्गैः
    वाचं विनापि वदसीव मयि प्रसादम्॥ २६ ॥

अयमनवम सूक्तैरादिभक्तैर्यथावत्
    विशदित निज तत्त्वो विश्वमव्यादभव्यात्।
रथ चरण निरूढ व्यञ्जनानां जनानां
    दुरित मथन लीला दोहळी देहळीशः॥ २७ ॥

इयमवितथ वर्णा वर्णनीय स्वभावात्
    विदित निगम सीम्ना वेङ्कटेशेन गीता।
भव मरु भुवि तृष्णालोभ पर्याकुलानां
    दिशतु फलमभीष्टं देहळीश स्तुतिर्नः॥ २८ ॥

॥ इति श्रीदेहळीशस्तुतिः समाप्ता ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥